This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ शिवस्तुतिविषमपदव्याख्या॥ शार्वाः शिवसंबंधिनः॥
१ एतादृशाः कपर्दीः जटाजूटः॥ वटशीरसंवलितकेशरज्जुग्रंथिसार्थाइत्यर्थः॥ नः अस्माकं॥
शर्मसुखं॥ दद्यासुः प्रयच्छंतु॥ घोराण्यपरमभयंकराणि॥ अंहांसिपातकानि॥ वीरुदाः लता
प्रतानिनीवीरुदिसमराड्ढल्पः॥ तासांआलिः पंक्तिः॥तस्याः यद्रूहनं॥तत्कर्तायः शिखीदावा
नलः॥ तस्यशिखाइवस्थिताइत्यर्थः॥ अतएवदुर्वारेत्यादि॥ दुर्वाराः दुःसाध्या॥ आपत्तिःवि
पत्तिः घोरनरकादिदुःखसंततिः॥सेवगत्तैः भूच्छिद्रविशेषः॥तंश्रिताः आश्रितास्तत्रतिन रामू
त्तरदिनरालंबनशून्याइति॥एतादृशायेनिखिलजनाः लोकाः तेषांयदुध्धारणंनस्मिन्नरज्ज १

Acc. No. 875. M-1539
Title - शिवस्तुति विषम पद व्याख्या.
Author - ?
Date - ?
Subject - टीका. (Commentory)
Folio - 13
Xerox - 26

Checked 2012

K K S U LIBRARY
RAMTEK
441 106
M-1539
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५९

शिवस्तुति

१

सटिक

रामू

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

2

वइवबभवुः॥ रज्जवोहिवहिष्ठेनांतर्निक्षिप्ताश्चेर्तद्धपनितोध्धरणकारणीभूताभवंनीतिलोकेप्र
सिध्धमेवतद्देतेपिदीर्घत्वबलितत्वदुरुध्धरः दुःखमहारवातपतितसर्वजीवसमुद्धरणसाध
नीभूतत्वात्तद्रूपिणएवेसर्थः ॥ अतएवंमूर्ध्नीत्यादि॥ मूर्ध्निशिवमस्तके। राजतइतिराजतीवि
राजमाना॥तत्रहेतुः सरसेति॥ रसेनअनुरागेण॥सहवर्त्ततइतितयाएतादृशीयास्करस
रिद्भागीरथी॥ तत्संबंधीयः पारः सगरपुत्राणांकपिलाचार्यशापेनभस्मीभूतानांनरककूप
तः समुद्धरणान्मतानदीविशेषतः समुत्तारणासारइवपारस्तसर्यंतयावद्भागीरथीजलंपा
तालेसमुद्द्वारासगरकूपंप्रविशतिनावसर्यंतमपीसर्थः॥ निर्यत्त्वांश्रुनिर्यतः निःसरंतः प्रभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शा

रामू २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्ययाशंकानांकुर्वन्स्वैर्यदिवास्थितमित्यर्थः॥ यन्त्रिपुरंशंकारीणांरुद्रशत्रुभूतप्रसिद्धासुरविशेषाणांपुराणांरुद्रशत्रुसंबंधिनगराणां॥ येनृणि॥ त्रयस्त्रिनयस्ययोविजयस्तद्धेतुनापराजयस्तेननिमित्तेनकृतास्तज्ञापनार्थलोकेस्वीयंशक्त्वासल्यंप्रकटयितुंमारेखास्तद्दाचरितमित्यर्थः॥ अतएवअलिकंललाटमेवहिनधराधित्यकाहिमाचलोर्ध्वभूमिः तस्यायोंऽतस्मरमभागस्तत्रविधाअलकनंदामंदाकिनीभागीरथीभेदेनत्रिप्रकारायाउर्वीप्रकाशमानाजान्हवीगंगानद्यदाभायस्यननेयेत्यर्थः॥ अतएवउपेतिचंद्रभाशुभ्रमित्यर्थः॥ २॥ श्रीशंकरायभवापहारकायरत्यहरायनमः॥ कुध्यदिति॥ अक्षित्रिनीयनेत्रं॥ नः अस्माकं॥ अस्तोकाअनल्पाआपद्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विपंतस्याः निकृतिर्विध्वंसिः सदा निरंतरं ॥ मास्तकं मस्तके भवं ॥ हुतवहः अग्निः कणिकालेशः ॥
तस्याः मोक्षः प्रसेपः ॥ सएवरूपंस्वरूपंयस्येतिनथा ॥ कुध्यतिलीलासंक्रीडा कलहादिनाकुप्यती
ति ॥ एतादृशीयागौरीतस्याः प्रसादार्थं आनतिः साष्टांगप्रणतिः ॥ तस्याः यः समयः कालः ॥ त
त्रपदांगुष्ठसंक्रांतलाक्षाबिंदुः पदांगुष्ठनः संक्रांतः भालेसंस्पर्शवशात्संबध्यः यः लाक्षाबिंदुः
सौभाग्यमंडनार्थं तल्लाक्षितलाक्षरसबिंदुस्तेन सहस्पर्द्धते ॥ अतएव ॥ स्फटिकोवामणिर्नीहीरका
श्मः शुक्लरत्नविशेषः ॥ तत्रदृषदिवशिलावद्घनतयामग्नंखचितंयन्मणिकंपद्मरागाग्नि
धंयच्छोणरत्नं ॥ तद्वच्छोभतइतिनथा ॥ मूर्ध्निमस्तके ॥ उद्यंतीप्रकाशमानादिव्यसिंधुः गंग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदी ॥ गलिना अधोमुखंच्युता ॥ शफरिकामत्स्यीनस्याइव आकारोयस्यतन्नयेत्यर्थः ॥ ३ ॥ लोहितशुक्ल
कृष्णवर्णेवतूसूर्येचंद्रालकयोः शिवनेत्रयोरपित्रिवर्णत्वेसामान्यतः सिध्येस्निग्धवर्णत्वेनैवोच्य
तइति ॥ परिवेषावेशेषइवपरिवेषेकदेशइवोर्वरितः सर्गस्थितिसंहृतिक्लेशनिष्पत्तिध्वंसव्याप्ति
रेतादृशः ॥ स्फुटंस्पष्टंयथास्यात्तथा ॥ अतीवनिर्वृत्तगर्वगर्वालंदृष्टिकल्पितोजगत्कारणत्वाघमिमा
नोयस्यएतादृशं ॥ ४ ॥ निर्मेघप्रचंडतेजस्विनीं ॥ रुक्माज्यपिंडेकनकमलवत्पिंगवर्णेत्यर्थः ॥
तथात्वंगौरीमुखप्रतिबिंबवशादेव ॥ प्रपंचः सर्वोपिसंसारः ॥ ध्वांतमेवअंधतमसमेवनीलांबरं
तेनरुचिरहन्माहान्कंचुकः कवचविशेषोयस्यसतथा ॥ सर्वतः तमःपटावगुंठितएव ॥ पार्वत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूर्यचंद्रात्मकनेत्रपिधानेनेति॥दिशपतिमुखा॰मित्राः देवशत्रवः॥जैत्रः पराजयपरायणः॥
नेत्रेलोचने॥[illegible]॥नेत्रेध्यात्विंद्रियाश्वानामुत्कृंसन्मार्गेकप्रवृत्तिनियामकेप्रवेतामिनि॥
॥५॥चंडरुक्सूर्यस्फटूपांडूशिवस्यकर्पूरगौरत्वेपिगौरीमुखप्रतिबिंबप्रसादादेवपीनव
र्णोगंडौकपोलौविनेतुंदूरीकर्तुं॥रत्नकोणैः हिरकादिरत्नांशैः॥विघृष्टिविशिष्टघर्षणरत्व सैः
नां॥विननुतश्वरचयतः॥किमिसन्नयः॥मुखपुरस्कारकृतेसतिकुंडलयोरांदोलनंस्वाभा
विकमेवनत्रोक्तविघर्षणौक्षेवेयमिसाशयः॥ ध्वांतानितेषांखंडाः ध्वंसाः अतिशौंडेप्रख्याते रामू
इत्यर्थः॥अवनतः प्रणतः आखंडलः इंद्रः याम्यांनेनथा॥६॥उदयः उच्चतरः उदंचत्कणः ४

उच्चैर्वनूयः फणः नवनू॥ कम्रः कामदृत्प्रागुक्तरीत्या गौरीकर्तृकस्वचुंबनेछुएतादृशंयद्
लांबुरुहंमुखकमलंतस्यपरिलसंतीएतादृशीयाकर्णिकातन्मध्यस्थकोशस्तदाकारातत्स
दृशीशोभाउत्तुंगघोणः उन्नः नासिकास्योऽवयवः स्कघोणः शोभनंनासिकांशइति॥ ७॥ ९
बिंबिनोसंजातप्रतिबिंबाएतादृशींलक्ष्मयंतीपश्यंतीसती॥ स्पर्ध्यायाः अतिनिघ्नाआधीनात
त्परतंत्रामत्सरेकपत्वशावसतीतियावत्॥ अर्वंहुलदृशमीशुक्लदशमी॥दिव्यसिंधोः कम्मि
तुः गंगाकामुकस्य॥ अवनमंतः अग्निनमंतः लोकपालाः याम्यांतो॥ अभ्यस्तांपालंचतान्॥
॥८॥ निभृतः गूढः उपांतस्थितइवापिनिकटस्थितइवापि॥ आर्द्रस्निग्धागिरिसना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पार्वतीयंपिबतो॥स्करनसमये संधयतीत्यर्थः शोणीकृतोनाः अरक्तवर्णीकृताः अंताः सिंदूर
५ पूरणंविनाप्यारक्तांनीताः सीमंतदेशाः एषांतेनथा लोकाः यदरुणमह्नसा यदीयारुण
॥९॥ दीप्तेत्यर्थः ॥ सातिरेकाः अतिरेकेणउत्कर्षेणसहिताः संपदः संपत्तीर्विधतां करोत्य
र्थः॥ फेनपुंजाः फेननिचयाः तेषामवलीसंक्तिरिवेत्यर्थः॥ दनुपायादंदोवारिकस्य॥
दनोर्दीयादोवंश्योबाणासुरः सःदौवारिको द्वारपालोयस्यसतथा॥ प्रोन्नतानाम्राभासमा
नाग्राचसति॥९०॥ सःनांहः ध्वनिः उर्वरांप्रत्यूषपर्वतः तेननितरांक्षामीतितथा॥पर्वत रामू
समीपेमेघध्वनिरतीवदेगांभीर्यमावहतीति॥ घनसमयः प्रावृडारंभकालः॥९१॥ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उल्लुप्तः पुनः पुनरावृतः ॥ स्फूर्जद्भ्राम्यमानः ॥ उरुउत्कटम् ॥ तदपि न्यक्कुर्वन् ॥ तिरस्कुर्वन् ॥ परब्रह्मस्थितः परब्रह्मैवस्थित आसीदिति ॥ प्रकटितकरणं नादानुसंधानलक्षणमेकाग्र्यसाधनं येनसः ॥ आत्मनादः ॥ आत्मनः नादः स्वचकइत्यर्थः ॥ ९९ ॥ व्यामिश्रे वसम्मिलितेव लसतीशोभा तइत्यर्थः ॥ तुलितः स्वसाम्यमानीतः ॥ दंतस्फिः दंत कांतिभिः स्फीकृत्वा विस्मृतदेहः ॥ अभिभवविकोः पराभवपरायणाः वृष्टिं प्रचुरांबु धिं ॥ तस्मिं ॥ कृषीष्टकरोतु ॥ १२ ॥ १३ ॥ स्नानवद्याः स्करभ्याः निस्त्रः ॥ लिखिताइव अतिनीलग्ररलतुल्यकज्जलरेखाइत्यर्थः ॥ कज्जलतुल्यग्ररलरेखाइत्यर्थः ॥ समाप्तो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि सम्यंगरवंशोभनइत्यर्थः ॥ कंधरा ग्रीवा मंथरा अचला आकल्पः गौरीकृतोयः स्ववल्ला
लंकारमंडनादिवेशः तस्यया आलिंगनकालिकी अनल्पमा विपुलशोभानयेत्यर्थः ॥१४॥
उपांतेनिकटे प्रार्थितुं वांछितुं योग्यस्थितिर्यस्य सतथा तमिंतियावत् ॥ स्वोत्थानांस्वैः चंद्रा
दिभिः सहउत्था संभूतिर्येषांतेनतया तेषांविषादीनां ॥ निवेशंसमवस्थानं वारयंस्वै विषा
[redacted]दिकंहिमरुर्नुः शरीरेप्रविष्टंचेत् मदुनिष्ठमेवकुर्यादितिधिया॥
प्रतिषेधयंसाइत्यर्थः ॥ अचलमुवेपार्वत्यै एतेन मत्कृंजयमाहात्म्यानभिज्ञत्वे ॥ जडजन्यत्वं
हेतुर्घोनितः ॥ पतिंप्रति अमृतत्वे अखंडम् ॥ मृतिराहिसविषयएवस्थितः वर्तमानः कालं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्लावर्णेनूस्ल्यनूसन्निसर्यः। आशिषः लं आखंडं सौभाग्यवतीभवेत्यादीर्वादान् प्राउंनेव अ
र्थतः प्रयुक्तवानिव ॥१५॥ नागोगदाढ्यंवासुक्यादिकेयूरवदिसूचितमित्यर्थः संगं गौरीसं
गं अर्जितंसंपादितं ॥ दुरितमितियावत् प्रोढं उत्कटम् ॥ पार्वेदुमुख्याः राकासुधाकरास्या
याः दृढतरपरिरंभेषु ॥ गाढतमालिंगनेष्वित्यर्थः ॥ १६ ॥ वाहाः बाहवः ॥ दिवः द्युलोक
रचनायाः कर्मितुः कामुकस्येत्यर्थः ॥ कंठे कंठस्य वा ॥ यः आश्लेष आलिंगनं ॥ तस्यार्धं उद्
ग्वर्तिकैलासस्थितत्वेन ॥ दिवः कंठस्य हरबाहूनां तद्भागावच्छेदेन संबंध्यतेपि ॥ दक्षिण
भागावच्छेदेन तद्भावार्धालिंगनमितियावत् ॥ आसाः प्रा॰ स्थिताइत्यर्थः संसारसिंधोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्ममरणप्रवाहरूपसमुद्रस्येत्यर्थः॥ स्फटिकेति स्फटिकमणीनांशुद्धस्फटिकरत्नानां एमहांतःसंक्रमाः संक्रम्यते अतिक्रम्यतेनद्यादयःस्मेनथा तेषांए आकाराः नैदहीर्घाइत्यर्थः तीर्यक्दक्षिणोत्तरमार्गमध्यइतिरोधनं॥ तिर्यग्विक्रं यथाभवंतितथा॥ विष्कंभभृताः स्वध्याईना भूरादित्रिलोक्यामव स्थानार्थंरोधकावभवुः ॥भिन्नेति॥ निर्द्दलितत्रिपुरासुरादिशरीराइत्यर्थः॥ १७॥ लयजलेन प्रलयकालिकेकार्णवांभसा॥मिलितंमिश्रितंयदुरसि शुक्लनरत्वादिना उत्कर्षेणभासनशीलं॥ भस्मप्रलयानलभस्मितंनेनउस्मितंलिप्तमित्यर्थः॥ रूक्षाः अस्निधाः स्वाभाविकरोर्यात्प्री तिरहिताः॥ निक्षिप्तकुंभंनिक्षिप्तौ अंतर्गतीकृतौ कुंभौ कुचकनककलशौयस्मिंस्तन्तथा॥१८॥

CC-0. In Public Domain:Kavikulguru Kalidas Sanskrit University Ramtek Collection

नो नांस्वस्थंभवतु वलयः लहर्यः ॥ कालशत्रोः उदरक्षीरसिंधौ अस्मिन्नेवंचिन्तयविस्मुदेवत्
वाक्षीराब्धौशयनमुचितमेवेतिभावः ॥ सलीलंसविलासंयथास्यात्तथा ॥ शेतांनिर्विकल्पकस
माध्यारव्ययोगनिद्रयास्वस्थंभवतियन्वयः ॥ हेनुगर्भविशेषणं ॥ मुक्तेनि ॥ मुक्तेर्जीवन्मु
क्तेः अमुक्तः अयक्तः ब्रह्मदृष्यानदस्मिन्नत्वात्तस्मिन्निर्यः ॥ पक्षेमुक्ताश्चिमौक्तिकेइवयुक्तेअत्य
क्तइतियावत् ॥ विचित्रेति ॥ विचित्राः अद्भुतसौंदर्यविशिष्टाः तथाआकुलाः अनंतकोटिब्रह्मां
डसन्निवेशेनबहिर्मारकूष्टाइवभासमानास्त्रस्तावलयस्त्राएवलहर्यः वक्रलस्निग्धल
जगज्जीवनहेनुत्वादिसाधर्म्यद्दीचयस्त्रासांयज्जालंतेनशालतइतिनयातस्मिन्निसर्थः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पक्षेविचित्राः विविधास्तयाआकुलाः परस्परोपमर्देन क्लिष्टाः एतादृश्यः याः वलिविशिष्टाः पंक्ति
शालिन्योलहर्यः ॥क्षीरवीचयस्तासांयत्फालेनेनशालतदृतितथातस्मिन्निसर्यः ॥अवांच
न्निति ॥अवनीचलेनैव अंचतिपूजितोमंवनीनितथातादृशोनाभिलक्षणः आवर्तः जलभ्रमणं
यत्रसतथायद्वानाभिरावर्तइवनिम्नतादिनायत्र ॥पक्षे अवांचन्निम्नले नैवशोभमानंनाभिरिव आ नः
वर्तोयत्रसतथातस्मिन्निसर्थः ॥विलोउदिति॥ विलोउतिकुंलढंनीतिविलोउन्एतादृशोभुज विः
गवरःशेषः तुंदबंदीभूतलात्तसेविष्णुतस्मीभूतलान्नेनेयुतेयुक्तइतियावत्॥ विशालेवि राम्
स्तृते ॥स्त्रिधामेति ॥त्रिविधंयद्धामप्रातर्मध्यान्हसायान्हभेदेनत्रिःप्रकारकोयः तस्मादप्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिअप्रतिमः अतएवनवरुचिरः अभिनवसुंदरः पक्षेप्येवमेव॥ कांतीरूपरमायाः पक्षेकांति
रतुल्यकमलायाइति॥ मंदिरैःसागारीभूते॥ शशिसमप्रभे॥१९॥ वैय्याघ्रीव्याघ्रसंबंधिनी॥
कृत्तिःचर्मविस्तृतोपत्यकांतेनिकटभूम्यंतप्रदेशइतियावत्॥ उपत्यकाद्रेरासन्नाभूमिरूर्ध्व
मधिसकेसरात्॥ अवश्यायनिश्राहिमसंसिक्तेसर्थः॥ नीलेति॥ अभिनवकादंविनी॥ व
परितः समंततः॥ स्फुरतिभासते॥ आबध्नेति॥ आसमंताद्बद्धः अहींद्रएवबासःकिरीव
कांचीगुणः मेखलारज्जुर्यत्रतत्तथा॥ शैलजायाः आक्रीडएवउद्यानमिवविहारस्थानत्वा
द्भूमेवेसर्थः॥ अतिघनंअतिदृढम्॥२०॥ ऊरूजानूर्ध्वभागविसर्थः॥ त्रिलोक्याअपिए

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धुतरजघनस्येव पृष्ठावष्टम्भभूतौ ॥ यथाऽधुनरजघनस्यय: कटिसंज्ञक: पृष्ठभागस्तद्वष्टं
भनधुरीणौ प्रकृतोरूभवतस्तथात्रेलोक्यस्यापि मूर्लोकादे: पृष्ठस्यापि असुरादिकृतपीडो
पमर्दनद्वारा अवष्टम्भभूतानाश्रयीभूतावित्यर्थः ॥ प्रसभंबलात्कारपूर्वकं ॥ अरिघराघ
स्मरौ अरीणांशत्रुणांयाघराकरिणांघटनाघटेयमरात्करिपंक्तिसदृशीयेयंनिबिडसेना.
तस्याः घस्मरौवलुभक्षकावित्यर्थः ॥ भस्मनाशुक्लौपांडुरवर्णावित्यर्थः ॥ अवनतौकृतन
मस्कारावित्यावत् ॥ २१ ॥ इंदुकांतोपलौचंद्रकांतमणीताभ्यांरचितौयौसमुल्लौकरंड
कौनद्धदाचरनस्तेतयोरित्यर्थः ॥ तांडवेनआकुंचितानिसंकुचितानि ॥ विदधतिकुर्वतिस

राम्.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि॥ कांचीनि॥ कांची भूत नागरा॰ जशिरसां प्रतिमुहुः प्रतिवारं वारं ॥ उपधानायमानेउप
धानीभूतेस्तः॥ धूतीनि॥ कांतिजिता मृतकिरणे॥ क्षणंउत्सवंप्रति आनंदायस्तोभवंतां
॥२२॥ मंजीरीभूताः नुपुरीभूताः येभोगिप्रवरगणाः तेषांयानिफणा मंडलानि तेषां
नर्मध्य इत्यर्थः॥ व्यादीप्तानि प्रकाशमानानि यान्यनर्घ्यरत्नानि अमूल्यमणि वृंदानि तेषां
द्युतिभिः कांतिभिः किसलयिते पल्लवे इवस्थिते इत्यर्थः ॥ क्षपद्भिः इंद्रादिदिविषद्भिः॥नः
अस्माकं मानसे ॥विघ्नमंविलासं॥ विघ्नौघस्यानां ॥कीदृशांनः इहलोकेभजताम्॥ सेव
मानानामिति॥ २३॥ भूरिभारैः विपुलतमगंधपुष्पादिपूजासंभारैरिनियावत्॥ अप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चितिभूजां ॥ अभिहतौ परिवेष्टितौ ॥ वारिजैः मनः कल्पितकाञ्चनकमलैरित्यावत् ॥ नृपद्
वरौ पादाग्रलक्षणौ तद्रूपौ यौ दृढतल्पौ महाकूर्मावित्यर्थः ॥ अङ्गानि मिलाभाः कान्तिर्यासां
सकाशात्तौ ॥ २४ ॥ एकाङ्गस्य निजैकलेशस्य ॥ पातान् अधोरोधान् ॥ आकूत्रेतायुगे ॥ निज
स्यनिवासस्थानीभूतं ॥ अचलवरं कैलासपर्वतं ॥ चालयंतं मुन्मूलयंतं ॥ दशास्यं रावणम् ॥
बहलंविपुलं गलन्नस्रवन्नरक्तं रुधिरं येभ्यस्तानि तथा तादृशानि यानि वक्त्राणि मुखानि तैः ॥
प्रणुन्नाः संपीडिताः प्राणाः यस्मिन् कर्मणि यथा भवति तथा आक्रोशयन् ॥ सं-रोदया
मासुः पारंगुल्यः नः अस्माकं कल्याणं शीघ्रं दिशंतु प्रकाशयंतु ॥ श्लोषः हाहः तत्र कल्याः

रामा
१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सज्जादृश्यर्थः॥ त्रण्ध्येति॥ प्रकर्षेणनद्धाः वध्राः अहिवल्यः सर्पपंक्तयोयाभिस्तास्तथेसर्थः॥
फुल्लेति॥ संफुल्लमल्लिकामाल्यकुलतुल्यलीलाद्युतियावत्॥ २५॥ प्रक्नम्र॥ प्राचीनबर्हि
रिद्धः॥ स्करवराः अग्र्यादिलोकपालाश्चतेषांप्रस्फुरंतोभासमानाः येमौलयोमुकुटाः तत्रस
क्तानिसंबध्धानियानिज्यायांसिरत्नानि महामणयः तेषांयउत्करः संघास्तेषांयउस्राः किरणाः
तैरित्यर्थः॥ नीराजिताकृतनीराजना॥ अतएव॥ प्रोद्ग्रा॥ प्रोद्ग्राणिप्रकर्षेणशोभमाना
नि अग्रणियस्याः सातथेसर्थः॥ एतादृशी आसीत्॥ नखालिः पादांगुलिनखपंक्तिः तारका
णांनाराणांननिरिवपंक्तिरिव॥ नितांतं अत्यंतं॥ नोऽस्मभ्यं श्रियम्॥ प्रदेयात्प्रदद्यात्॥ २६॥स

२ पक्षेनारयंतिभवसमुद्रादीनानितिनारकास्ततविदस्तेषामित्यर्थः॥

K K S U LIBRARY
RAMTEK
441 106
M-1539
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साः पार्वसाः ॥ससाननेंदोर्यथार्थं मुखचंद्रेइसर्थः॥ सविधगतेनिकटवर्तिनिसति॥विकास
स्निवरध्यानेस्तइसर्थः॥ पाद्संवाहनादिकालएवश्रमेणगौरीमुखयथार्थचंद्रस्यतन्नैकल्य
संभवान्नरानीमेवतयोस्नानलक्षणहार्दारुणिमप्रकाशनलक्षणविकसनंकोकनदसा
म्येनतत्रयुक्तमेवेतिभावः ॥ तथापामराज्ञि॥ स्वांतेअंतकालेनिजमरणकालइसर्थः॥
स्वांतेअंतःकरणेयेसरसंसप्रेमयथास्यात्तथा॥ दधानाः संतःश्रियंमोसलक्ष्मीलभंतइति॥
लोलंसतल्लंलोलंबकानामिवरलयोः सावर्ण्याद्भ्रमराणामिवेत्यर्थः॥ रुधियांत्रंसविदांकुलं
कर्तृ॥ सेवंतेभजंतइसर्थः॥ तेविमलतररुचः शुध्धस्फटिकसंकाशस्य॥एणयाणेःकरध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तहरिणस्य ॥ पदांभोरुहे सादकमले मत्साऐश्वर्येण ॥ मत्सेनिरतिशयसंपत्सर्थमित्यर्थः ॥ आस्तां
भवताम् ॥ २७ ॥ क्षतिर्विध्वस्तिस्तामित्यर्थः ॥ यांतियांतु ॥ अरुणे आरक्तवर्णे एतादृशे ॥
पादकमले ॥ तास्यांश्रीश्चितास्तत्सकाशात्सादुर्भूताइत्यर्थः ॥ आम्नेति ॥ आम्नायतेऽम्नाआत्मा
रिविरः मः बुधयः मूर्तयः आकृतयश्च येषांतेचतेऋषदः इंद्रादिदेवाः तथाऋषयः मरीच्यादयः ॥
तेषांयापरिषत्सभातस्यामूर्ध्निमस्तकइत्यर्थः ॥ शेषार्यतेनिर्माल्यार्थेणवहाचरंतितेनथे
तियावत् ॥ एतादृशाः संतः दुरितेनि ॥ दुरितंतदुपलक्षितंमखिलकर्महरतिस्वोदयद्वारा
नाशयतीतितथा ॥ एतादृशाः परागाः नःअस्मभ्यं चिरं अखंडम् ॥ तान्येयु॰ तारयंतु ॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यआक्षसीम्नाअस्तः अस्तंगतः नष्टइतियावत् ॥सीमामर्यादायस्यसतथा ॥एतेनानंत्यंध्वन्यते॥
एतादृशेनभूम्नाबहोर्भावोभूमातेननिरतिशयमहत्वेनेत्यर्थः ॥ध्रुवंदृश्यम् ॥ अनुस्वंअ
धिष्ठानत्वेनव्याप्तमित्यर्थः ॥यद्धाम्नांसोराशीनांमध्येभूरिधाममहातेजः॥ कूटस्थस्वंप्रका
शचैतन्यमितियावत् ॥ साम्नांसाम्नाख्यवेदविशेषांशानांपरमंनिरूपणम्॥ निरीहंनिष्क्रि
यं ॥इतिहेनोःमहांतः पंडिताः गगनंप्राहुरवोचन्निितियावत्॥ तन्मोहंशंशिवस्यपारमा
र्थिकंरूपम् ॥एतादृशंमहः चैतन्यरूपंतेजः मेयेमोहरोहंविषयासक्तंकुरु ॥निहं
तुध्वंसयतु॥२९॥ सदितेति॥ निर्दलितासक्तसंततिप्रदइत्यर्थः॥ नंदितेति॥ नंदितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काशीखंडप्रसिद्धश्रवलोकस्कदर्शनवक्त्रदानेनतोषितःश्रीपतिर्लक्ष्मीकांतोपियाभिस्तस्स
थानाम्यइत्यर्थः॥३०॥ पृथुकुचयोर्यैभिरोभारोनयोर्दुर्वहंयेषांतेतथा॥ मुग्धेति॥ मुग्धेपरम
सूक्ष्मलारुगुरंयदबलनंमध्यमतेनविलसंतिनेतथा॥ चकितेति॥ चकितानीनायाहरिणी
नद्वन्नेत्रांतोअपांगोयेषांतेतथा॥ हरिणीनिवृत्तमपि॥एतादृशाउमाक्र्याः हरस्यबहिश्च
राः प्राणाः॥त्राणंरक्षणं॥क्रियास्कः कुर्वंतु॥३१॥तेषामेवधियास्वयंसासितयातेषांस्मरति
ताननुसंरुधन्नतिसंबंधः॥३२॥ दीप्यत्प्रासप्रसमानःमूर्धनिइंदुखंडः अर्धचं
द्रोयस्यसतथा॥ शितंनिशितंतीक्ष्णंएतादृशंसितंशुभ्रंनखरंनखंतेनछिन्नंलोकेशमुंड

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुरास्यमस्तकम्। येनसतथा॥ कृत्रः कामयिता॥ रोमांचवशादनिपीनौगंडौकपोलौयस्य
१३ सतथा॥ प्रलयहुतवहेसंवर्तीन्नावपिप्रस्फुरंतस्रक्स्रोद्भूलनेनभासमानाः बाहुदंडाःयस्य
सतथा॥ एतेनाविनाशित्वंद्योत्यते॥ द्योतनं आत्मनः प्रकाशनंतत्रशौंडः विख्यातइत्यर्थः॥ प्र
चंडः अद्भुतः स्वतोऽसंगतेपिसर्वनियामकत्वात्॥ कलयतु संपादयतु॥ ॥
इतिश्रीशिवस्तुतिसटीकं संपूर्णम्॥ श्रीकाशिविश्वेश्वरार्पणमस्तु॥ श्रीकृष्णार्पणमस्तु॥ श्रीरस्तु॥ श्रीरामकृष्णार्पणमस्तु॥ ॥छ॥ ॥छ॥ ॥छ॥

रामू
१३

K K S U LIBRARY
RAMTEK
441 106
M·1539
Dist. Nagpur

26

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.09.20 10:26
,TRANSFERRED=2020/09/24 at 10:30:24
,PAGES=26
,TYPE=STD
,NAME=S0003704
,Book Name=M-1539-SHIVSTRUTI VISHAMPAD VYAKHAYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection